# संस्कृत सहकारिन्

## कथा



सरस्वति नमस्तुभ्यं वरदे कामरूपिणी ।

विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

Salutation to you O Goddess Sarasvati, who is giver of boons, and who has a beautiful form!
I begin my studies. Let there be success for me always.

# Prepared by

Dr. Kumud Singhal
ksinghal@ieee.org
408-934-9747
Version #2

Version #1 available at http://www.arshavidyacenter.org/sanskrit_sahakarin.pdf

# Presented by
# Arsha Vidya Center

Many thanks to our Sanskrit Teacher Śrī Vijay Kapoor

# Table of Contents

1.1 Subhasitas .... 4
1.2 Stories .... 4
1.2.1 Clever crow .... 4
1.2.2 The might of intelligence .... 5
1.2.3 The Lion and the mouse .... 6
1.2.4 The Brahmin and the goat .... 7
1.2.5 The monkey and the crocodile .... 8
1.2.6 The strength of unity .... 9
1.2.7 The frog and the mouse .... 10
1.2.8 The king and the sweeper .... 11
1.2.9 The mango seller .... 12
1.2.10 A poor wise man .... 13
1.3 Kālidāsa .... 14
1.3.1 You and I are indeed one .... 14
1.3.2 “Bhādhati” bhādhate .... 15
1.4 Rāmasya Caritram .... 16
1.4.1 Lesson 1 .... 16
1.4.2 Lesson 2 .... 17
1.3.3 Lesson 3 .... 18
1.4.4 Lesson 4 .... 19
1.4.5 Lesson 5 .... 20
1.4.6 Lesson 6 .... 21
1.4.7 Lesson 7 .... 22
1.4.8 Lesson 8 .... 23
1.4.9 Lesson 9 .... 24
1.4.10 Lesson 10 .... 25
1.5 Bhāgavata kathā .... 26
1.6 Mahābhārata kathā .... 27

# 1.Stories

## 1.1 Clever crow

एकस्मिन् वने अनेके काकाः वृक्षस्य शाखासु वसन्ति। वृक्षस्य अधः कोटरे एकः सर्पः वसति। यदा काकाः प्रातः बहिः आहारार्थं गच्छन्ति तदा सर्पः वृक्षं आरुह्य, काकशिशून् खादति। काकाः दुःखिताः। तदनन्तरं ते एकं वृद्धं काकं साहाय्यं प्रार्थयन्ति। वृद्धकाकस्य उपदेशम् अनुसृत्य धीरः काकः नदीं गच्छति । तत्र राजकुमारी स्नानं करोति। तस्याः आभरणं नदीतीरे शिकायाम् अस्ति। काकः आभरणम् आदाय वृक्षं प्रति गच्छति। तदा राजकुमार्याः सेवकाः काकम् अनुगत्य वृक्षस्य समीपं गच्छन्ति। काकः आभरणं वृक्षस्य कोटरे क्षिपति। सेवकाः तत् दृष्टवा कोटरस्य बहिः काष्ठैः ताडयन्ति। सर्पः बहिः आगच्छति। सेवकाः सर्पं मारयन्ति ।



In a certain forest many crows live in the branches of a tree. Below in the tree's cavity a snake lives. In the morning, When the crows go for food outside in the morning , then a snake having ascended the tree eats the crows young ones. The crows were sad, Thereupon they request a old crow to help. Having followed the old crow's advise one courageous crow goes to the river. There a princess is bathing. Her ornament is on the stone on the river bank. The crow having taken the the ornament goes towards the tree. Then the princess's servants, having folllowed the crow go near the tree..The crow drops the ornamnet in the hollow of the tree. Having seen that, the servants beat the outside of the tree's hollow with the sticks. The snake comes outside. The servants kill the snake.

परोपकाराय फलन्ति वृक्षाः परोपकाराय दुहन्ति गावः। परोपकारय वहन्ति नद्याः परोपकारार्थम् इदं शरीरम्॥

Trees bear fruits for the welfare of others, cows milk to help others, rivers flow for the welfare of others and the body also to help others.

## 1. 2 The might of intelligence

एकः सिंहः अस्ति । तस्य अभिधानं भासुरकः अस्ति । सः प्रतिदिनम् अनेकान् मृगान् मारयति। एकदा सर्व मृगाः तस्य समीपे गच्छन्ति। वदन्ति च - हे मृगराज, त्वम् अनेकान् मृगान् प्रतिदिनं मारयसि । त्वं तान् न मारय (√मृ (1) लोट् 2nd per. S), प्रतिदिने क्रमेण एकः मृगः स्वयम् एव तव समीपे आगच्छति । तम् एव खाद । तृप्तः भवः। सिंहः प्रतिवदति – एवम् अस्तु। तदा प्रतिदिनम् एकः मृगः तत्र गच्छति । सिंहः तं खादति । एकदा शशकस्य वारः अस्ति । सः मार्गे कूपं पश्यति । सः सिंहस्य समीपे गच्छति वदति च – हे वनराज , वने एकः अन्यः सिंहः अपि अस्ति । सः कथयति –अहं वनराजः , न तु भासुरकः। भासुरकः यदा तत् आकर्णयति। तदा कुप्यति । तदा शशकः तं सिहं कूपं नयति। भासुरकः कूपे स्वप्रतिबिम्बः पश्यति । सः चिन्तयति यत् – कूपे अन्यः सिंहः अस्ति । अहं तं मारयामि। सः कूपे कूर्दति। स्वयं नश्यति च । अतः प्राज्ञाः कथयन्ति –बुद्धिः यस्य बलं तस्य।



There is a lion. His name is Bhasuraka. He everyday kills many animals. Once all the animals went near him and said, “Hey, King of animals! you kill many animals everyday. (Please) You do not kill them. Everday in a serial order one animal will come near you on it’s own. You eat him. Be satishfied.” The lion replied, “ So be it.”

Then everyday one animal goes there. The lion eats him. Once it is a turn of a rabbit. He sees a well on the way. He goes near the lion and says, “ Hey King of the forest! There is also another lion in the forest. He says, “ I am the king of the forest not Bhasuraka.”

When Bhasuraka hears that then he is angry. Then the rabbit leads that lion to the well. Bhasuraka sees his own reflection in the well. He thinks that, “there is another lion in the well, I will kill him. He jumps in the well and destroys himself. Therefore wise people say, “ (He) who is intelligent is strong.

1.3 The Lion and the Mouse

पर्वतस्य समीपे वनम् आसीत। तस्मिन् वने सिंहः अवसत्। सः च दिवा सुप्तौ रात्रौ वने परिभ्रमन् पशून अभक्षयत्। कदाचित् प्रभूतम् आहारं चितवान् अयं सिंहः वृक्षस्य छायायां निद्रया परिभूतः। बहवः मूषकाः बिलात् बहिः आगताः सानन्दं सिंहस्य शरीरे अनृत्यन्। तेन उक्तम् -"भोः प्रभो त्वं पशूनां सम्राट् श्रूयसे। तव पराक्रमः ज्ञातः। अहं क्षुद्रः त्वं बलवान्। अतः एव मयि दयां कुरु"। सिंहः मूषकस्य वचनं श्रुतवान् तं मुक्तवान्। तदनन्तरं नरेण तस्मिन् एव वृक्षे जालं बद्धम्। तस्मिन् जाले पतितः सः सिंहः।तेन उच्चैः रुदितम्। तं श्रुतवान् मूषकः आगतः उक्तवान --" हे प्रभो ! अलं भयेन। अस्माात् जालात् अहं मुञ्चामि "। सः जालं दन्तैः अकृन्तत्। सिंहेन उक्तम् -"अहो मम मित्रस्य कृतज्ञता !"



There was a great forest near the mountain. In that forest, there lived a lion. And he slept in the mountain during the day, and during the night, wandering in the forest ate animals. Once, having collected much food, the lion was overcome by sleep in the shade of a tree. Many mice having come out of (their) holes danced on the body of the lion with joy. Pained by it, the lion woke up. One of the many mice was held by the lion. He said, "Oh Lord, you are heard to be the king of animals. Your bravery is known. I am weak, you are strong. for this reason alone be kind to me." The lion, hearing the mouse's speech, freed him. (Sometime) after that on that very tree, a net was tied by a man. In that net the lion fell. He cried loudly. The mouse heard him, and having returned, said, " O Lord, enough with fear. I release you from this net." he did (cut) the net with (his) teeth. The lion said, "Wow!, look at my friend's gratitude."

नरस्य आभरणं रूपं रूपस्य आभरणं गुणः। गुणस्य आभरणं ज्ञानं ज्ञानस्य आभरणं क्षमा॥

Appearance is the ornament of a person, good characters for appearance, knowledge for good characters and forgiveness/patience for knowledge.

## 1.4 The Brahmin and the goat

अस्ति गौतमस्यारण्ये कश्चिद् ब्राह्मणः । सः च यज्ञाय अन्यस्मात् ग्रामात् छागं क्रीत्वा स्कन्धे नीतवान्। सः गच्छन् धूर्ताभ्याम् अवलोकितः। ततं तौ धूर्ताः चिन्तितवन्तौ -- "यदि एषः छागः केनापि उपायेन लभ्यते तदा मतिप्रकर्षः भवेत्" इति। ततः तौ वृक्षयोः तले तस्य ब्राह्मणस्य आगमनं प्रतीक्ष्य मार्गे स्थितौ। तत्र एकेन धूर्तेन गच्छन् सः विप्रः अभिहितः। "भो ब्राह्मण किम् कुक्कुरः स्कन्धेन उह्यते इति। विप्रेण उक्तम् --"न अयम् कुक्कुरः किन्तु यज्ञच्छागः " इति। तदन्तरम् द्वितीयेन धूर्तेन तथैव उक्तम् । तत् अकर्ण्य ब्राह्मणः छागं भुमौ निधाय परीक्ष्य च साशंकम् अवदत् --"मम छागः किं कुक्कुरः भवेत् " इति। प्रथमेन धूर्तेन उक्तम् --"पश्य । मा स्पृश। तीव्रैः दन्तैः दशेत् " इति। भयात् विप्रे क्षिप्रं गते धूर्तौ सानन्दं छागं हृतवन्तौ।




There is a Brahmin in Gautama's forest. And he, having brought a goat from another village for sacrifice, carried it on his shoulder. While going, he was seen by two rogues.Then the two rogues thought, 'If the goat can be obtained some means or the other, that would be an excellent idea'. Then the two placed themselves below two trees on the way, waiting for brahmin to come. The brahmin, as he was going, was addressed there by one rogue: 'O! brahmin, are you carrying a dog on the shoulder?' The brahmin said, 'This is not a dog, it is a sacrificial goat'. After some time, the same thing was repeated by the second rogue. Having listened to them, the brahmin, after having put the goat down on the ground and after having fearfully examined it, said 'Is my goat really a dog?' The first rogue said 'Look, do not touch. It might bite you with sharp teeth.' The brahmin having quickly gone away out of fear, the two rogues happily took away the goat.

1.5 The monkey and the crocodile

एकस्मिन् नदीतटे जम्बूवृक्षः वर्तते । तस्मिन् एकः वानरः वसति । सः नित्यं मधुराणि जम्बूफलानि खादति । तस्यां सरितायाम् एकः मकरः अपि वसति । सः वानरस्य मित्रं विद्यते । वानरः मकराय अपि मधुराणि जम्बूफलानि यच्छति । एकदा मकरः स्वाभार्यायै फलानि नयति । मकरस्य जाया फलानि खादति । सा चिन्तयति , " यः प्रतिदिनं मधुराणि जम्बूफलानि भक्षियति तस्य हृदयं कीदृशं मधुरम् " ? सा मकराय कथयति , " अहं वानरस्य हृदयम् इच्छामि । " ततः मकरः सरितायाः तटम् आगच्छति । वानरेण सह सः सरितायाः जले तरति । मार्गे सः कथयति , " मम भार्या तव हृदयम् इच्छति । " चतुरः प्लवङ्गमः शीघ्रं भाषते , " मम हृदयं तु अहं वृक्षे स्थापयामि । अतः तत्र मम शीघ्रं गमनम् आवश्यकम् । मूर्खः मकरः तथा आचरति । तदा शाखामृगः सतवरं वृक्षस्य विटपम् आरोहति । ततः सः भाषते , "मूर्ख , अपि हृदयं शरीरात् पृथक् वर्तते ? अद्य आवयोः मैत्री आगच्छति "।



There is a rose apple tree on a river bank. In that a monkey lives. He daily eats sweet rose apple fruits. In that river a crocodile also lives. He becomes monkey's friend. He also gives the sweet rose apple fruits to the crocodile. Once the crocodile carries the fruits to her wife. The crocodile's wife eats the fruits. She thinks, " (One) who eats sweet rose apple fruits every day, in what way his heart will be sweet? She says to the crocodile, " I desire (that) monkey's heart.
Then the crocodile comes to the bank of the river. With the monkey , He crosses (swims) in the water of the river. On the way he says, " My wife desires your heart." Clever monkey speaks quickly," But I placed my heart on the tree. Therefore my going there quickly is necessary. The foolish crocodile does accordingly . Then the monkey immediately climbs the branch of a tree. Then he says, " Oh fool, Is the heart seperate from the body? (From) today friendship of two of us comes (to end).

## 1.6 The strength of unity

कस्यचित् वृद्धस्य चत्वारः पुत्राः आसन्। ते सदा परस्परं कलहायमानाः आसन्। बहुधा प्रयतमानः अपि सः वृद्धः तेषु परस्परप्रीतिं कल्पयितुं अशक्तः अभवत्। कदाचित् सः वृद्धः मरणतल्पे अवर्तत। पुत्राः सर्वे तत्तल्पस्य परिसरे आसन्। वृद्धः तेषु कंचित् आहूय --"काष्ठबन्धं एकं आनय" इति आज्ञापयत्। सः तथैव काष्ठबन्धं आहरत्। वृद्धः पुत्रेषु एकैकं आहूय-- "काष्ठबन्धं एनं भञ्जय", इति उवाच। किन्तु कोपि तं भफ्जयितुं न अशक्नोत्। ततं सः वृद्धः --"तं काष्ठबन्धं उन्मुच्य एकैकं काष्ठं भञ्जयत" इति उवाच। तेषु एकैकोपि एकैकं काष्ठमादाय क्षिप्रं विना श्रमेण अभञ्जयत्। तदा वृद्धः अवदत् --"पुत्राः एकैकं काष्ठं युष्माभिः सुलभतया भग्नं न काष्ठबन्धः। अतः यूयं सदा सङ्घीभवत। तदा न कोऽपि युष्मान् बाधेत" इति। एवं सङ्घे शक्तिं तेभ्यः अबोधयत्।



An old man had four sons. They were quarrelling always among themselves. The old man could not make them friendly to each other however much he tried. One day the old amn was on the death bed.All the sons were by his bed side. The old man called one of them and ordered, "Bring a bundle of sticks,: Accodingly, he brought a bundle of sticks. The old man called one by one from among them and said, "you break this bundle of sticks." But, nobody could break it. Then the old man said, " You untie the bundle of sticks and break each of them seperately." Every one of them took one stick and quickly broke it without difficulty. Then the old man said, "Oh sons, a single stick was broken by you easily; but not the bundle of sticks. Therefore you should be always united. Then nobody can trouble you". Thus he explained to them the strngth of unity.

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः। न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

Work is indeed achieved by effort, not by desires. The deer indeed does not enter the mouth of a sleeping lion.

## 1.7 The frog and the mouse

कस्मिंश्चित् तटाके कोऽपि मण्डूकः अवर्तत। तस्य तटाकस्य तीरे मूषिकः वसति स्म। कालक्रमेण मण्डूकः मूषिकः च मित्रे अभवताम्। कदाचित् मूषिकः तटाके प्लवनं ऐच्छत्। किन्तु सः प्लवनं न जानाति स्म। अतः तौ आलोच्य रज्ज्वा स्वपादौ अबध्नीताम्। मण्डूकः जले उत्पलुत्य इतस्ततः प्लवते स्म। तत्पादबद्धः मूषकः अपि तेन सह जले अचरत्। इत्थं तौ चिराय जले प्लवनसुखं अन्वभवताम् । तस्मिन् समये कश्चित् गृध्रः आकेशे डयते स्म। सः जलोपरि प्लवमानं मूषिकं अपश्यत्। सः झडिति स्वपादाभ्यां तं अगृह्णात्। हन्त् मूषिकेन सह तत्पादबद्धः मण्डूकः अपि अभक्षयत्। स्थलवासी मूषिकः जलवासिना मण्डूकेन सह मैत्रीं अकरोत्। तेन उभावपि सह एव मृत्युं प्राप्तवन्तौ॥ अतः समयोः एव मैत्री शोभते।



There was a frog in a pond. A mouse was living on the bank of the same pond. Gradually the frog and the mouse became friends. One day the mouse wanted to swaim in the pond. But it did not know swimming. Therfore, they consulted and tied their feet together with a thread. Then the frog jumped and swam hither and thither. The mouse with its leg tied was floating with it on the water. In this way they enjoyed the swimming in the water. At that time an eagle was flying above. It saw the mouse swimming in the water. At once it caught it and lifted with its feet. Alas! the frog tied with the mouse was also hanging with it. He happily obtained both the frog and the mouse and killed and ate them. The mouse living in the land made friendship with the frog living in the water. Hence both of them died together. Therefore, friendship of two persons of the same line only will work.

अन्नदानं परं दानं विद्यादानमतः परम्।अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया॥

The gift of food (is) supreme gift but the gift of knowledge is superior (to the gift of food). With food the satishfaction is for moment while with knowledge, (satisfaction is) life long.

## 1.8 The king and the sweeper

एतस्मिन् देशे गोपालः अभिधेयेन नृपतिः अवसत्। एकदा प्रातः तेन नगर्याः मलहारकः अदृश्यत। तस्य दर्शनेन नृपः भृशम् अपकुप्यत् मलहारकस्य वधम् आदिशत् च। नृपतेः आदेशेन निरपराधः जनः बिमूढः अभवत्। नृपस्य सभायां सुमतिः अभिधेयेन पारिषदः आसीत्। सः मलहारकम् अभाषत् --"वधात् पूर्वं मम समीपम् आगच्छ। त्वया वचनं भाष्यताम्। वधस्य स्थानम् अगच्छत् मलहारकः। वधात् पूर्वं सः सुमतेः समीपम् आगच्छत्। तं वचनम् अभाषत " । किन्तु तौ नृपेण आदृश्येताम्। नृपतिः सुमतिम् अपृच्छत् -- " तेन दुर्जनेन किं अभाष्यत ?" सुमतिः अवदत् -- "एतत् तस्य वचनः -- प्रातः मया नृपः अवालोक्यत।। तस्य दर्शनात् मम वधः भवति। नृपेण अपि प्रातः अहं अदृश्ये। किन्तु मम दर्शनात् तस्य वधः न अस्ति। आवयोः कतरः दुर्जनः ?" नृपः एतानि वचनानि अचिन्तयत् । क्षणात् अनन्तरं सः क्रोधात् न्यर्वतत मलहारकं च अमुञ्चत्।

In this country there lived a king by the name Gopala. Once in the morning the sweeper of the city was seen by him. The king became greatly angry by his sight, and orderd the killing of the sweeper. The innocent person became bewildered by the king's order. In the king's court, there was a courtier by the name Sumati. He told the sweeper " You come near me before the killing and say (these) words." The sweeper went to the place of execution. before the execution he went near Sumati. He spoke the words. But those two were seen by the king. The king asked Sumati "What was spoken by that bad person?" Sumati said "These are his words: 'The king was seen by me in the morning. Because of his sight, my killing happens. I was also seen by the king in the morning. But because of my sight he is not killed. out of us who is the bad person?' " The king thought over these words. After a while his anger went away and he released the sweeper.

## 1.9 The mango seller

आम्रम् । आम्रम्।

कीदृशं फलं तव अस्ति। आम्राणि पश्यानि।

पश्यतु भवान्। तादृशं फलं अद्य कुत्र भवता प्राप्तुं शक्यते ?

मूल्यं कियत् वद।

द्वादश-आम्राणि चतुर्भिः रूप्यैः विक्रीयन्ते।

किं वदसि ? चत्वारि रूप्याणि। तावत् मूल्यं दातुम् अमर्थः अस्मि।

साधु। कियत् भवता दातुं शक्यम् ?

द्वादशानां द्वे रूप्याणि।

भवान् मां परिहसितुम् इच्छति। येन मूल्येन एतानि मया क्रीतानि तत् भवतः मूल्यात् भूयः।

भवतु। अहं गच्छामि।

तिष्ठतु भवान् । मम वचनं श्रयताम्।

तव वचनं श्रोतुं न इच्छामि। अलं कलहेन। चत्वारि इति त्वया उक्तं। द्व इति मया उक्तं। द्वादशानां त्रीणि रूप्याणि दातुं युज्यने।

साधु। कियन्ति फलानि यच्छामि। एकं दीयताम्।

Mango, mango.
What kind of fruits do you have? Let me see the mangoes.
You may see, your honor. These days where can you get such fruits?
Say how much the price is.
A dozen mangoes are sold for 4 rupees.
What do you say? 4 rupees? I am unable to give the price.
Alright. What price can be given by your honor?
Two rupees for twelve.
Your honor wants to laugh at me (make fun of me). The price at which those fruits were bought by me is more than your honor's price.
Let it be. I am going.
Stay your honor. My words should be listened to (please listen to me).
I do not want to listen to your words. Enough with the quarrel (Let us not quarrel). You say 4. I say 2. Is it proper to give 3 rupees for twelve?
Alright. How many fruits do I give?
Let one be given.

## 1.10 A poor wise man

एकस्मिन् ग्रामे कश्चन पण्डितः आसीत् । सः सर्वाणि शास्त्राणि सम्यक् पठितवान् । सर्वं अजानात् सः । किन्तु सः अतीव निर्धनः । तस्य गृहं न आसीत् । भोजनम् अपि अत्यन्तकष्टेन अभवत् । तस्य वस्त्राणि अत्यन्तजीर्णाणि च आसन् । ततः सः भोजनार्थं भिक्षाम् अकरोत् । सः गृहात् गृहं गत्वा भिक्षां देहि इति अयाचत । अनेके जनाः तस्य जीर्णाणि वस्त्राणि दृष्ट्वा उन्मतः इति चिन्तयन्ति स्म । ततः गच्छ गच्छ इति उक्त्वा कपटपिधानं कुर्वन्ति स्म । केषुचित् दिवसेषु सः पण्डितः नैव खादितवान् । एकदा कथंचित् नूतनवस्त्राणि सम्पादितवान् । कश्चन धनिकः तानि वस्त्राणि पण्डिताय दत्तवान् । तदा सः पण्डितः तानि नूतनवस्त्राणि धारयित्वा भिक्षार्थं यथापूर्वम् अगच्छत् । प्रथमगृहे एव गृहस्थः भोः आगच्छतु । अस्मत् गृहे भोजनं करोतु इति अत्यन्तगौरवेण तं भोजनार्थम् अन्तः नीतवान् । सः पण्डितः भोजनार्थम् उपविशत् । भोजनार्थं सूपानि मोदकानि अपूपान् सर्वाणि मधुरभक्ष्याणि परिवेषितानि । सः पण्डितः प्रथमः प्रार्थनां कृत्वा हस्तेन मोदकम् एकं स्वीकृत्य नूतनवस्त्रेभ्यः खादतु खादतु इति उक्त्वा खादयति स्म । गृहस्थाः तत् दृष्ट्वा विस्मिताः नैव अवगच्छन्ति स्म । ततः ते एवम् अपृच्छन् । वस्त्राणि अन्नं न खादन्ति खलु । किमर्थं महान् पण्डितः भवान् वस्त्रेभ्यः भोजनं ददाति इति । तदा सः पण्डितः एवम् उक्तवान् । एतत् नूतनवस्त्रकारणात् एव अद्य भोजनं भवता दत्तम् । ह्यः एव अस्मिन् एव गृहे भवान् एव गच्छ गच्छ उक्तवान् । अतः एतत् भोजनं वस्त्राणां प्रभावात् लब्धम् इति तेषां कृतज्ञः अस्मि । ततः एव वस्त्रार्थं खादयामि इति उक्तवान् । ते गृहस्थाः किंचित् लज्जितवन्तः ।

There was a paṇdita in a village. He was well-versed in all Scriptures. He knew everything. But, he was very poor. He did not have a house .He got his food even with great difficulty. And his clothes were very worn out. Therefor he (used) to get (beg) alms for food . He went from house to house begging , "(Please) give (me) alms. Having seen his wornout clothes many people thought he is mad. Having said "Go away, Go away" (they) shut the door. Incertain days that paṇdita (have) not just eaten. Once somehow he obtained new clothes. A rich man gave those clothes to the paṇdita. Then that paṇdita having worn those new clothes went for alms as before. In the very first house (he went) the householder (said), "Sir , please come in." Please have food in our house. With great respect he lead him inside for food. That paṇdita sat down to eat. Soups, ladoos, vadas, all kind of sweets were served for food. Having prayed first, that paṇditā (took) a laddo with his hand and (began) to feed his new clothes saying ," Eat, Eat". Having seen that, the householders were surprized and did not understood. Therefore ttey asked thus, "Clothes do not eat, right? Then why , O great paṇdita, your majesty gives food to the clothes. Then that paṇdita answered thus, " Because of this new cloth. (you) gave food today. Yesterday just in this very house you spoke , "go away, go away". Hence (since) this food was obtained due to the clothes , I am grateful to them. He said , therefore I am feeding the clothes. Those householders were a little ashamed.

## 2. Kālidāsa

### 2.1 You and I are indeed one

एकदा कः अपि पण्डितः महाकविं कालिदासं प्रति गच्छति। सः वदति- हे महाकवे, महाकविषु तव नामधेयं नास्ति" इति। महाकविः कालिदासः तं पृच्छति "कथम् एतत् शक्यम् ? यदि मम नाम तत्र नास्ति तर्हि के महाकवयः ?" इति। सः पुरुषः वदति, " महर्षिः वालमीकिः आदिकविः । तस्य रामायणं नाम महाकाव्य लोकेषु प्रसिद्धम्। द्वितीयः महाकविः महर्षिः व्यासः अस्ति। सः विशालबुद्धिः। महाभारतं नामं महाकाव्यं तस्य विशालबुद्धेः प्रमाणम्। तृतीयः महाकविः दण्डी। तस्य महाकवे दशकुमारचरितम् नाम गद्यपद्यः प्रसिद्धम् इति। महाकविः कालिदासः एतत् आकर्ण्यति। तेन च सः व्यथितः भवति। सः चिन्तयति, " एतस्य कारणम् अहं देवीं शारदाम् एव पृच्छामि" इति। सः देव्याः शारदायाः मन्दिरं गच्छति । सः देबीं पृच्छति , "हे देवि वाल्मीकिः आदिकविः। व्यासः समर्थः ऋषिकविः। एतौ महाकवी श्रेष्ठौ । अधुना जनाः "दण्डी एव कविः" इति वदन्ति॥ यदि एते एव महाकवयः प्रसिद्धाः तत् कः अहम् ? सस्मिता देवी तं महाकविं भणति , " त्वम् एवाहम् " इति। तेन महाकविः कालिदासः प्रसन्नः भवति।

Once a certain Paṇdita goes towards the great poet Kālidāsa. He says, "Oh great poet, your name is not among great poets. The great poet Kālidāsa asks him," How is this possible? If my name is not there then who are the great poets?".That person says," Great sage Vālmīki is the first poet. His great poem named Rāmayaṇa is famous in the world. Second great poet is great sage Vyāsa. He is a great intellect. Great poem named Mahābhārata is proof of his great intellect. The third great poet is Daṇdi. This great poet's alternate prose and poetry Daśkumārcharitram (by) name is famous. The great poet Kālidāsa hears this. And he becomes depress by that. He thinks, "I will ask Devi Śāradā alone the reason of this . He goes to the temple of Devi Śāradā. He asks the Devi, "Oh Devi, Vālmīki is the first poet, Vyāsa is an able sage poet. These two great poets are the best. Now people say, " Daṇdi is also a poet." If those great poets are famous then who am I?" Smiling Devi speaks to the great poet, " You and I are one ." Great poet Kālidāsa becomes happy by that.

## 2.2 “Bhādhati” bhādhate

अस्ति उज्जयिन्यां विक्रमः भूपालः। प्रजारक्षणपरः अपि सः नित्यं काव्यशास्त्रविनोदेन कालं नयति।कविषु पण्डितेषु च सत्कारपूर्वकं धनं वितरति। अतः बहवः कवयः पन्डिताः च प्रतिदिनं तस्य सभाम् आगच्छन्ति। योग्यतानुसारेण धनं च लभन्ते। कालिदासः नाम विख्यातः कविवरः विक्रमस्य सभायां राजकविः अस्ति। केचित् कवयः तत् राजकविपदम् अभिलषन्ति, अतः एव कालिदासेन सह अपर्धन्ते। अथ(then) एकदा कश्चित् पण्डितः चिन्तयति , “उज्जयिनीं गच्छामि, कवित्वं दर्शयामि, नृपात् राजकविपदं च विन्दामि” इति।शीघ्रमेव सः उज्जयिनीं प्रतिष्ठते (प्र√स्था (1); to go) । “ कः अपि महापण्डितः आगच्छति ”इति वार्ता उज्जयिन्यां स्र्वत्र प्रसृता।प्रमुदितः नृपः विक्रमः पण्डितस्य स्वागतार्थम् अमात्यान् आदिशति (आ√दिश् (1); order)। पण्डितस्य स्वागतार्थम शिबिकया सह नगरसीमाम् अमात्याः गच्छन्ति।कालिदासः अपि शिबिकावाहकवेषेणान्यैः वाहकैः सह गच्छति।सन्तुष्टः पण्डितः शिबिकां प्रविशति।वाहकाः आन्दोलिकां स्कन्धेन वहन्ति। कालिदासः अपि शिबिकादण्डं धारयति। किन्तु अनभ्यासात् शिबिकादण्डः तस्य स्कन्धः पीढयति।अतः सः तं दण्डं स्कन्धांत् स्कन्धं पुनः पुनः परिवर्तयते। पण्डितः तं पृच्छति, “ अयम् आन्दोलिकाटण्डः स्कन्धे बाधति किं तव ”?। तस्य प्रश्ने “बाधति” इति अशुद्धशब्दं वाहकवेषधारी कालिदासः आकर्णयति झटिति वदति च ,“ न तथा बाधते दण्डो यथा ‘बाधति’ बाधते। पण्डितः चिन्तयति “ विक्रमस्य नृपस्य वाहकः अपि मम दोषान् दर्शयति ” इति। अतः सः वाहकं पृच्छति, “ कः त्वम् ? ”। “अहं कालिदासस्य सेवकः ” इति वदति कालिदासः। ‘यस्य कालिदासस्य सेवकः अपि मम प्रमादं दर्शयति, तेन महकविना सह , स्पर्धा विफलैव ’ इति विचारेण सः पण्डितः कालिदासमेव शरणं गच्छति। कालिदासः स्वयं तं राजसभाम् आनयति, नृपः तं सत्करोति , सः च आनन्देन स्वनगरं गच्छति।

In Ujjyini there is a king named Vikrama. Besides looking after his subjects, he also amused himself daily by spending time in the study of poetry and science He distibutes money among poets and learned ones and treated them honourably. Therefore many poets and learned ones come to his court everyday.

They obtain (receive) money,according to their worth (ability). A famous poet named Kālidāsa is the royal poet of Vikram’s court. Many poets desire that post of royal poet, hence (they were in) rivalary with Kālidāsa. Then once a learned one thinks, “I will go to Ujjyini, I will show (my) poetic abilities and find out about the post of the royal poet from the king. Quickly he goes to Ujjyini. “Some great learned person has arrived.,” (he) spreads (this) news everywhere in Ujjyini. The delighted king Vikram orders the ministers for learned one’s welcome. (to welcome the learned one)

The ministers go near the city with the palanquin to welcome the learned one. Kālidāsa also in a diguise of a palanquin bearer goes alons with the other palanquin bearers. Satishfied learned one enters the palanquin. The bearers carry the panquin on (their) shoulders. Kālidāsa also places the palanquin rod (on his shoulder). But from no practice, the palanquin rod pains his shoulder. Therefore he changes the rod from one shoulder to another again and again.

The learned one asks him,

“Is this panaquin rod troubling your shoulders?”

The disguised palanquin bearer Kālidāsa hears the incorrect word “badati” in his question and quickly speaks, “ The rod does not trouble (me) so, as “badhati” troubles (me)”.

The learned one thinks, “Even King Vikram’s bearer sees my faults.” Hence he askes the bearer, “ Who are you?”

“I am Kālidāsa’s servant” says Kālidāsa.

`Even one who is Kālidāsa’s servant sees my mistake, rivalary with that great poet will not be

successful.` with this thought that learned one goes to Kālidāsa’s refuge alone. Kālidāsa himself brings him to the court (and) the king welcomes him and he goes to his city with joy.

## 3. Rāmasya Caritram

रामाय रामभद्राय रामचन्द्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥

Salutations unto Lord Rāma, who is auspiciousness, who is in the form of the shining light (consciousness present in all beings), who is the creator, who is the Lord of the Raghu clan, the Lord, of all beings and the husband of Sītā.

Sanskrit text from देववाणीप्रवेशिका by Robert P. Goldman & Sally J. Sutherland

### 3.1 Lesson 1

अस्ति नृपो दशरथो नाम। सोऽतीव धार्मिको भूमिपः सुखं जीवति। नृपस्य दुःखं नास्तीति भाषन्ते जनाः। एकदा दशरथो वनं गचछति। तस्मिन्वने ब्राह्मणस्य पुत्रो वसति। अहो सुन्दरं मृगं पश्याम्यहमिति चिन्तयति नृपः। बालकं च तीक्ष्णेन शरेण हन्ति। ब्राह्मण आगच्छति हतं पुत्रं पश्यति च। सोतीव कुपितो भवति॥ नृपं च शपति। हे मूर्ख त्वं किमिति मम पुत्रं हंसि। तव दुष्कृतेनाहं दुःखमनुभवसीति। पुत्रेण विना न जिवामि। त्वमप्यहमिव पुत्राच्छोकमनुभवसीति। नृपो वदति। हा हा नश्यामीति शोकेन पीडितो गृहं गच्छति।

<u>Sandhi</u>

अस्ति (√अस् (2)) नृपः दशरथः नाम (ind; by name)। सः अतीव धार्मिकः भूमिपः सुखं जीवति। नृपस्य दुःखम् न अस्ति इति भाषन्ते जनाः। एकदा दशरथः वनम् गचछति। तस्मिन् वने ब्राह्मणस्य पुत्रः वसति। अहो सुन्दरं मृगम् पश्यामि अहम् इति चिन्तयति नृपः। बालकम् च तीक्ष्णेन शरेण हन्ति (√हन् (2))। ब्राह्मणः आगच्छति हतंम् पुत्रम् पश्यति च। सः अतीव कुपितः भवति। नृपम् च शपति। हे मूर्ख त्वम् किमिति (ind. why) मम पुत्रम् हंसि। तव दुष्कृतेन अहम् दुःखम् अनुभवसि इति। पुत्रेण विना न जिवामि। त्वम् अपि अहम् इव पुत्रात् शोकम् अनुभवसि इति। नृपः वदति। हा हा नश्यामि इति शोकेन पीडितः गृहम् गच्छति।

<u>Translation</u>

There is a king Daśaratha by name. He is a very rightous king (and) lives happily. 'The king has no sorrow' thus speak the people. Once Daśaratha goes to the forest. In that forest a brahmin's son dwells. 'Oh I see a beautiful deer' thus thinks the king. And kills the boy with a sharp arrow. The brahamin comes and sees the killed son. He becomes very angry. And curses the king. Oh fool, why did you kill my son. I feel sorrow by your evil act. I can not live without my son. You (will) also feel the grief for the son as I ( feel) The king speaks. Ah! Ah! I am destroyed. He goes home with grief.

3.2 Lesson 2

दशरथस्तस्य कुपितस्य ब्राह्मणस्य वचनं श्रणोति। किंतु कालेन तं शापं बिस्मरति। अयोध्यायां भार्याभिः सह सुखं राज्यं करोति च। सुखितस्य नृपस्यैकं दुःखम् । तस्य पुत्रो नास्तीति। ततो ब्राह्मणैः सह सः प्रजायै यज्ञं करोति। अथ कालेन पुत्राणां चतुष्टययमुद्भवति। रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्चेति पुत्राणां नामधेयानि। पार्थिवस्य पुत्राः सुन्दराः शान्ता वीराश्च। तेषु ज्येष्ठो रामो गुणैः श्रेष्ठो भवति। तस्मान्नृपो रामे स्निह्यति विशेषतः।

दशरथः तस्य कुपितस्य ब्राह्मणस्य वचनम् श्रणोति। किंतु कालेन तम् शापम् बिस्मरति। अयोध्यायां भार्याभिः सह सुखम् राज्यम् करोति च। सुखितस्य नृपस्य एकम् दुःखम् । तस्य पुत्रः न अस्ति इति। ततः ब्राह्मणैः सह सः प्रजायै यज्ञम् करोति। अथ(ind, now, then) कालेन पुत्राणां चतुष्टययम् उद्भवति। रामः च लक्ष्मणः च भरतः च शत्रुघ्नः च इति पुत्राणाम् नामधेयानि। पार्थिवस्य पुत्राः सुन्दराः शान्ताः वीराः च। तेषु ज्येष्ठः रामः गुणैः श्रेष्ठः भवति। तस्मात् नृपः रामे स्निह्यति (√ स्निह् (4); सप्तमी) विशेषतः।

Daśaratha hears that angry brahamin′s word. But in course of time forgets that curse. In Ayodhyā with his wives (he) rules happily. The happy king has one sorrow. He has no son. Hence he performs a vedic ritual with brahamins for (having) children. Then in course of time a set of four sons are born. Rāma, Lakṣmana, Bharata and Śatrughna were the son's name. The king's son's are handsome, calm and brave. Among them the eldest Rāma is best with qualities. For that the king loves Rāma especially.

3.3 Lesson 3

यदा यदा दशरथो ज्येष्ठं पुत्रं पश्यति तदा तदा परममानन्दमनुभवति। रामेऽपि मत्या युतः। स सर्वान्वेदानवगच्छति धनुर्वेदस्यापि पारं गच्छति। यदा स बाणमुद्धरति तदा अपि कम्पन्ते स्वर्गे। एकदा कश्चन मुनिरयोध्यां प्रत्यागच्छति। दशरथं प्रति वदति च। भो नृप। वयं मुनयो राक्षसैरत्यन्तं पीडिता भवामः। त्वमेव प्रजानां रक्षकोऽसि। यदि त्वं न कंचन वीरं प्रेषयसि तर्हि वयं सर्वे नष्टाः स्म इति। दशरथो वदति। भो मुने। येभ्यो राक्षसेभ्य ऋषयोऽप्युद्विजन्ते तेषां हनने कः समर्थ इति। मुनिर्वदति। कौचन समर्थौ वीरौ वर्तेतेऽयोध्यायामिति। कौ ताविति पृच्छति दशरथः। तव पुत्रौ रामो लक्ष्मणश्चेति भाषते द्विजः। यदा नृपो मुनेर्वचनं श्रृणोति तदा सोऽतीव दुःखितो भवति। यतो ब्राह्मणो मनुष्येषु देवो भवति ततो नृपोऽपि ब्राह्मणस्य वचनं करोति। ततः प्रियौ च पुत्रौ वनं प्रेषयति ब्राह्मणेन सह।

यदा यदा दशरथः ज्येष्ठंम् पुत्रम्  पश्यति तदा तदा परमम् आनन्दम् अनुभवति। रामः अपि मत्या युतः (adj), सः सर्वान् वेदान् अवगच्छति धनुर्वेदस्य अपि पारम् गच्छति। यदा सः बाणम् उद्धरति तदा अपि कम्पन्ते स्वर्गे। एकदा कश्चन मुनिः अयोध्याम् प्रति (ind. to,until) आगच्छति। दशरथम् प्रति वदति च। भो नृप। वयम्  मुनयः राक्षसैः अतयन्तम् पीडिता भवामः। त्वम् एव प्रजानाम् रक्षकः असि। यदि त्वम् न कंचन वीरम्  प्रेषयसि तर्हि वयम्  सर्वे नष्टाः स्म इति। दशरथः वदति। भो मुने। येभ्यः राक्षसेभ्यः ऋषयः अपि उद्विजन्ते तेषाम् (gen. pl of तद्; M) हनने कः समर्थः इति। मुनिः वदति। कौचन समर्थौ वीरौ वर्तेते अयोध्यायाम् इति। कौ तौ इति पृच्छति दशरथः। तव पुत्रौ रामः लक्ष्मणः च इति भाषते द्विजः। यदा नृपः  मुनेः वचनम्  श्रृणोति तदा सः अतीव दुःखितः भवति। यतः ब्राह्मणः मनुष्येषु देवः भवति ततः नृपः अपि ब्राह्मणस्य वचनम् करोति। ततः प्रियौ च पुत्रौ वनम् प्रेषयति ब्राह्मणेन सह।

Whenever Daśarata sees (his) eldest son then (he) feels supremse joy. Rāma is also endowed with intelligence. He understands all the Vedas (and he) also excells in the science of archery. When he lifts the arrow then the Gods too tremble in the heaven. Once a sage came to Ayodhyā. And he speaks to Daśaratha. Oh King. We sages are exceedingly afflicted by the demons. You indeed are the protector of the subjects. If you do not send some brave person then we all be destroyed. Daśaratha speaks. Oh sage. The sages who also tremble from those demons , who is capable killing them? The sage speaks. There there two capable brave persons in Ayodhyā. ‘Who are those two’ thus asks Daśaratha. The Brahmin says your two sons Rāma and Lakṣamana. When the king hears the words of the sage then he becomes very sad. Since the brahmin is the God among humans therefore the king does according to the the words of a brahmin. And therefore (he) sends his two beloved sons to the forest with the brahmin.

### 3.4 Lesson 4

यदा नृपस्यानुज्ञामाप्नोति रामस्तदा मुनिना सह सोऽरण्यं गच्छति। तत्र वने बहव ऋषयो वसन्त्याश्रमेषु। ते सर्वदा ध्यानमाचरन्ति यज्ञान्कुर्वन्ति च। तीस्मन्नेव काले बहवो राक्षसास्तान्मुनीन्बाधन्ते। राक्षसेभ्योमुनिनां रक्षणायागच्छति रामः। बालकोऽपि स वीरो बहून्राक्षसानिषुभिर्हन्ति। यत्र यत्रायाति राघवस्ततस्ततो निशाचरा बिभ्यति पलायन्ते च। यत्र कुत्रापि राक्षसान्पश्यतो रामो लक्ष्मणश्च तत्र तेषां गात्राणि छिन्त्तः। यदा सर्वे निशाचरा हता निर्गता वा सन्ति तदा रामो वनं जहाति मिथिलां चागच्छति। तस्मिन्देशेऽतीव पण्डितो नृपो जनको नाम राज्यं करोति। जनकस्यातीव रमणीया कन्या सीता नाम। सर्वासां नारीणां श्रेष्ठा सेति चिन्तयन्ति जनाः। सीतया सह विवाहं करोमीति चिन्तयन्ति सर्वे नृपाः। ततस्ते मिथिलां प्रति समागच्छन्ति।

यदा नृपस्य अनुज्ञाम् आप्नोति रामः तदा मुनिना सह सः अरण्यम् गच्छति। तत्र वने बहवः ऋषयः वसन्ति आश्रमेषु। ते सर्वदा ध्यानम् आचरन्ति यज्ञान् कुर्वन्ति च। तस्मिन् एव काले बहवः राक्षसाः तान् मुनीन् बाधन्ते। राक्षसेभ्यः मुनिनाम् रक्षणाय आगच्छति रामः। बालकः अपि सः वीरः बहून् राक्षसान् इषुभिः हन्ति। यत्र यत्र आयाति (√या (2)) राघवः ततः ततः निशाचराः बिभ्यति (√भी (3); plural) पलायन्ते च। यत्र कुत्रापि राक्षसान् पश्यतः रामः लक्ष्मणं च तत्र तेषां गात्राणि छिन्त्तः। यदा सर्वे निशाचराः हताः निर्गताः वा सन्ति तदा रामः वनं जहाति मिथिलाम् च आगच्छति। तस्मिन् देशे अतीव पण्डितः नृपः जनकः नाम राज्यम् करोति। जनकस्य अतीव रमणीया कन्या सीता नाम। सर्वासाम् (gen, र्सवा ; F); नारीणाम् श्रेष्ठा सा इति चिन्तयन्ति जनाः। सीतया सह विवाहम् करोमि इति चिन्तयन्ति सर्वे नृपाः। ततः ते मिथिलाम् प्रति समागच्छन्ति।

When Rāma obtains the permission of the king then he goes to the forest with the sage. There in the forest many sages live in the hermitages. They were always practicing meditation and doing Vedic rituals. At that time many demons harass those sages. Rāma comes for protection of the sages from the demons.Though a boy, he is brave (and) kills many demons with the arrows. To whichever place Rāma enters (arrives) , from there the demons are scared and flee. Anywhere Rāma and Lakṣmana see the demons, there they cut their limbs. When all the demons were killed or departed then Rāma will leave the forest and comes to Mithila. In that country a very wise king Janaka by name rules.. Sītā is the name of Janak′s very beautiful daughter. People think she is the best of all the women . “I will marry Sītā” thus think all the kings. Therefore they assemble to Mithilā.

### 3.5 Lesson 5

यदा रामः सीतामपश्यत्तदा तस्यामन्वरज्यत। तस्मिन्काले बहवो राजानः सीतायाः स्वयंवरायागच्छन्। जनको राजैवमवदच्च। यः कोऽपि राजा शिवस्य चापे बाणं संदधाति स मम कन्यां परिणयतीति। नृपा अचिन्तयन् अहो एतेन सुलभेन कर्मणा सोत्तमा नारी ममैव भार्या भवतीति। गर्विंतास्ते मूर्खा नाजानन् यच्छम्भोश्चापोऽतीव गुरुरिति। अथापि सर्वे प्रायतन्त। न कश्चन राजा तीस्मन्कर्मणि समर्थ आसीत्। अन्ततः श्रीरामो बालकोऽपि तं चापमुपागच्छत्। राजानस्तमपश्यन् प्राहसंश्च। अहो एष बालको वीराणां कर्मणि प्रयतत इति। स न किमप्यवदत्। किंतु चापं पत्रमिव लीलयोदहरदभनक्च। राजानोऽक्रुध्यन् किंतु जनकः सीता चातुष्यताम्।

यदा रामः सीताम् अपश्यत् तदा तस्याम् अनुरज्यत(√रञ्ज (4 A))। तस्मिन् काले बहवः राजानः सीतायाः स्वयंवराय आगच्छन्। जनकः राजा एवम् अवदत् च। यः कोऽपि राजा शिवस्य चापे बाणम् संदधाति सः मम कन्याम् परिणयति इति। नृपाः अचिन्तयन् अहो एतेन सुलभेन कर्मणा सा उत्तमा नारी मम एव भार्या भवति इति। गर्विताः ते मूर्खाः न अजानन् यत् शम्भोः चापः अतीव गुरुः इति। अथ अपि सर्वे प्रायतन्त। न कश्चन राजा तीस्मन् कर्मणि समर्थः आसीत्। अन्ततः श्रीरामः बालकः अपि तम् चापम्  उपागच्छत्। राजानः तम् अपश्यन् प्राहसन् च। अहो एषः बालकः वीराणां कर्मणि प्रयतते इति। सः न किम् अपि अवदत्। किंतु चापम् पत्रम् इव लीलया उदहरत् अभनक् (√भञ्ज (7);    लङ् म पु एक व)।  च। राजानः अक्रुध्यन् किंतु जनकः सीता च अतुष्यताम्।

When Rāma saw Sītā then (he) liked her. In that time many kings came for Sītā's Swayamabara. King Janaka spoke in this way. The king who brings Śiva's bow and arrow together he is the one who marries my daughter. The kings thought, Oh!  by this easy activity that excellent women indeed will become my wife. Those proud fools  did not know that Śiva's bow is very heavy. Thereupon all (of them) also tried. Not any king was capable in that activity. Finally Sri  Rāma even though a child approached the bow. The kings saw him and ridiculed (him). Oh! this boy is  attempting to do the work of a  brave person. He (Rāma) said nothing. But (he) lifted the bow like a leaf and broke it with sport. The kings were angry but Janaka and Sītā were happy.

3.6 Lesson 6

यदा जनकस्य कन्या पर्यणीयत दशरथस्य पुत्रेण तदा साधु साध्वित्यभाष्यत सर्वैः। जनकस्यापरा कन्या पर्यणीयत लक्ष्मणेन। ततो रामेण लक्ष्मणेन च सुखमन्वभूयत। अनन्तरं तौ द्वौ वीरावयोध्यां प्रत्यागच्छताम्। तत्र च सुखमुष्यते ताभ्याम्। कालेन राजा दशरथ आत्मानं जरया पीडितं जानाति। अपि च स स्वस्य ज्येष्ठं पुत्रं रामं राज्ये क्षमममन्यत। अहो वृद्धोऽस्मि। राज्यं न पुनरिष्यते मया। वनं मया गम्यते तत्र च तपः क्रीयते। मम राजस्य भारः पुत्रे निक्षिप्यत इति पुनरचिन्तयन्नृपः। तदा रामस्याभिषेकायाज्ञा राज्ञादीयत।

यदा जनकस्य कन्या पर्यणीयत (परि√नी) दशरथस्य पुत्रेण तदा साधु साधु इति अभाष्यत सर्वैः। जनकस्य अपरा कन्या पर्यणीयत लक्ष्मणेन। ततः रामेण लक्ष्मणेन च सुखम् अन्वभूयत। अनन्तरम् तौ द्वौ वीरौ अयोध्याम् प्रति अगच्छताम्। तत्र च सुखम् उष्यते* ताभ्याम्। कालेन राजा दशरथः आत्मानम् जरया पीडितं जानाति। अपि च सः स्वस्य ज्येष्ठम् पुत्रम् रामम् राज्ये क्षमम् अमन्यत। अहो वृद्धः अस्मि। राज्मं न पुनः इष्यते मया। वनम् मया गम्यते तत्र च तपः क्रीयते। मम राजस्य भारः पुत्रे निक्षिप्यते (नि√क्षिप् (6 A); entrust)। इति पुनः अचिन्तयत् नृपः। तदा रामस्य अभिषेकाय आज्ञा राज्ञा अदीयत।

When Janaka’s daughter was married by Daśaratha ‘s son then ‘well done’, ‘well done’ was said by all. Janaka’s other daughter was married by Lakṣmana. Therefore happiness was felt by Rāma and Lakṣmana. Soon after those two brave persons came to Ayodhyā. And there, happiness is abided by them. In cource of time , Rāja Daśaratha knows that (he) himself will be affllicted with old age. and he thought his own elder son Rāma is competent to rule. Oh I am old. Kingdom is not desired again by me. Forest would be gone to by me and there asceticism would be done. The king thought again (that) my kingdom’s load would be entrusted on (my) son. Then the command for the coronation of Rāma was given by the king.

*उष्यते present passive of वसति (dwell, abide)

3.7 Lesson 7

यदा दशरथस्याज्ञा जनैः श्रुता तदायोध्यानन्देन पूर्णैवाभवत्। नगरस्य मार्गेषु गायन्ति नृत्यन्ति च। तेन च स्वर्गेऽपिदेवास्तुष्टा अभवन्। अहो वृद्धेन पित्रा राघवो राजा कृत इत्युक्तं तैः। किं बहुना। अभिषेकस्य श्रवणादयोध्यानन्दस्य सागरे निमग्नेवाभवत्। पितुर्वचनं श्रूयते रामेणापि। तेन वचनेन प्रमुदितोऽपि स दुःखस्य लेशमन्वभवत्। यदि राज्यं क्रीयते तर्हि प्रियः वनं गच्छति। तदा भ्रातृभिः सह कथमिह तिष्ठाम्यहमिति।

यदा दशरथस्य आज्ञा जनैः श्रुता तदा अयोध्या आनन्देन पूर्णः एव अभवत्। नगरस्य मार्गेषु जायन्ति नृत्यन्ति च। तेन च स्वर्गे अपि देवाः तुष्टाः अभवन्। अहो वृद्धेन पित्रा राघवः राजा कृतः इति उक्तम् तैः। किम् बहुना। अभिषेकस्य श्रवणात् अयोध्या आनन्दस्य सागरे निमग्न् एव अभवत्। पितुः वचनं श्रूयते रामेण अपि। तेन वचनेन प्रमुदितः अपि सः दुःखस्य लेशम् अनुभवत्। यदि राज्यम् क्रीयते तर्हि प्रियः पिता वनम् गच्छति। तदा भ्रातृभिः सह कथम् इह (here) तिष्ठामि अहम् इति।

When Daśaratha's command was heard by the people then indeed Ayodhyā became filled with joy. They sing and dance in the streets of the city. Also the Gods in the heaven became pleased. Oh! Räma is made king by the old father was said by them (Gods). Why continue on. Because of coronation (of Rāma) Ayodhyā indeed became engrossed in ocean of happiness. Father's words were also heard by Rāma. By his words he was pleased and also felt a little sorrow. If the kingdom is ruled (by me) then dear father goes to the forest. Then how I stay here with my brothers.

3.8 Lesson 8

श्रीरामस्याभिषेकं श्रुत्वा सर्वे जना नन्दिता अभवन्। वस्तुतोऽयोध्यानन्दस्य सागरे निमग्नेवादृश्यत। दशरथस्य ज्येष्ठा भार्या कौसल्या नाम मम पुत्रो राजेति मत्वा परमं सुखमन्वभवत्। अथ वृद्धस्य राज्ञोऽन्या भार्या कैकेयी नामासीद् यस्याः पुत्रो भरतः। पुरा कस्मिंश्चित्समये सा दशरथस्य महान्तमुपकारं कृत्वा राज्ञो द्वौ वरौ प्राप्तवती। ततस्तु तौ वरौ न कदापि कैकेय्या वृतावास्ताम्। अधुना तु सा वरावनुस्मृत्य दशरथस्य समीपं गत्वा वचनमब्रवीत्। जयत्वार्यपुत्रः। अप्यनुस्मरत्यार्यपुत्रो मद्द्वौ वरौ वृणीष्वेत्यात्मनो वचनम्। राजा क्षणमेकं चिन्तयित्वावदत्स्मरामि प्रिये स्मरामि यदिच्छसि तद्ब्रूहीति। प्रथमेन वरेण मम पुत्रो भरतो राज्येऽभिषिक्तो भवतु। द्वितीयेन च रामोऽयोध्यां परित्यज्य वनं गच्छत्वित्युक्तवती कैकेयी। तस्यास्तद्वचनं श्रुत्वा दशरथो मूढ इव क्षणमुपविश्याशन्या हतो वृक्ष इव भुमावपतत् ।

श्रीरामस्य अभिषेकम् श्रुत्वा सर्वे जनाः नन्दिताः (√नन्द् (1) ppp नन्दित) अभवन्। वस्तुतः अयोध्या आनन्दस्य सागरे निमग्ना इव अदृश्यत। दशरथस्य ज्येष्ठा भार्या कौसल्या नाम मम पुत्रः राजा इति मत्वा परमम् सुखम् अन्वभवत्। अथ वृद्धस्य राज्ञः अन्या भार्या कैकेयी नाम आसीत् यस्याः पुत्रः भरतः। पुरा कस्मिंश्चित् समये सा दशरथस्य महान्तम् उपकारं कृत्वा राज्ञः द्वौ वरौ प्राप्तवती। ततः तु तौ वरौ न कदापि कैकेय्या वृतौ आस्ताम्। अधुना तु सा वरौ अनुस्मृत्य दशरथस्य समीपम् गत्वा वचनम् अब्रवीत्। जयतु आर्यपुत्रः। अपि अनुस्मरति आर्यपुत्रः मत् (abl S of अहम्) द्वौ वरौ वृणीष्व(√वृ (9 A); choose (as a boon) लोट् 2nd per. S) इति आत्मनः वचनम्। राजा क्षणम् एकम् चिन्तयति इति अवदत् स्मरामि प्रिये स्मरामि यत् इच्छसि तत् ब्रूहि (√ब्रू (2); speak लोट् 2nd per. A) इति । प्रथमेन वरेण मम पुत्रः भरतः राज्ये अभिषिक्तः भवतु। द्वितीयेन च रामः अयोध्याम् परित्यज्य वनम् गच्छतु इति उक्तवती कैकेयी। तस्याः तत् वचनं श्रुत्वा दशरथः मूढः इव क्षणम् उपविश्य (उप√विश् (6) having sat) अशन्या (अशनि F 3rd case S) हतः वृक्षः इव भुमौ अपतत् ।

Having heard of Rāma′s coronationa, all the people became overjoyed. In fact Ayodhyā was seen sunk like ocean of happiness. Having thought (that) my son is the king, Daśaratha’s eldest wife by name Kauaśliā felt great happiness. Also old king’s other wife’s Kaikeyi by name whose son is (was) Bharata. Sometime long ago, having done a great favour to Daśaratha, she had acquired two boons from the king. However those two boons were never chosen by Kaikeki, However now having remembered the two boons (and) having gone near Daśaratha, she said. May you be victorious, my Lord. Does my Lord remember his words, choose two boons from me. The king thinks for a moment (and) said, “I remember , dear I rembember, what you desire that you say. By first boon (is that) my son Bharata be consecrated into the kingdom and by second Rāma having abandon Ayodhyā should go the forest said Kaikeyi. Having heard those words of her, Daśaratha was stupefied (and) having sat for a moment fell on the ground like a tree struck by bolt of lightning.

3.9 Lesson 9

कैकेयीवचनं श्रुत्वा महाराजो महावज्रहतवृक्ष इव पतितो भुमितले। सेवकैः संज्ञां कथमपि प्रापितः सोऽवदत्। भरतमातस्तादृशं क्रूरकर्म मा क्रियताम्। ज्येष्ठपुत्रो वनं मा गच्छतु। यदि मम सुकुमारसुतो घोरारण्यं गच्छति तर्ह्यहं यमसदनमचिराद्गच्छामीति। किंतु सा राजपत्नी शोकाकुलस्य राज्ञः करुणवचनं श्रुत्वा केवलमहसदवदच्च। भो धर्मज्ञराज। पूर्वं स्वयं प्रतिज्ञाते वरेऽधुनाकथं विचारः। अस्मद्वंशे तन्न कदापि क्रियत इति। पुनः पुनर्निषण्णो नृपस्तच्चित्तपरिवर्तने प्रयत्नातिशयमकरोत्। अन्ततः स धर्मजालबद्धनृपो भवतु पापे मत्पुत्रो राम आहूयतामित्युक्तवा पुनस्तीक्ष्णशरहतखगवद्धरातले पतति स्म।

कैकेयी वचनम् श्रुत्वा महाराजः महा-वज्र-हत-वृक्ष इव पतितः भुमि-तले। सेवकैः संज्ञाम् कथमपि(somehow) प्रापितः सः अवदत्। भरत-मातः तादृशं (such) क्रूर-कर्म मा क्रियताम्। ज्येष्ठ-पुत्रः वनम् मा गच्छतु। यदि मम सुकुमार-सुतः घोर-आरण्यम् गच्छति तर्हि अहम् यम-सदनम् अचिरात् (soon) गच्छामि इति। किंतु सा राजपत्नी शोक-आकुलस्य राज्ञः करुण-वचनम् श्रुत्वा केवलम् अहसत् अवदत् च। भो धर्मज्ञ-राज। पूर्वं स्वयं प्रतिज्ञाते (promised) वरे अधुना कथं विचारः। अस्मत् (abl plural of ahm!) वंशे तत् न कदापि क्रियते इति। पुनः पुनर्निषण्णः नृपः तत् चित्त-परिवर्तने प्रयत्नाः अतिशयम् अकरोत्। अन्ततः सः धर्मजाल-बद्ध-नृपः भवतु पापे मत् पुत्रः रामः आहूयताम् इति उक्तवा पुनः तीक्ष्ण-शर-हत-खग-वद्धरा-तले पतति स्म।

Having heard the words of kaikeyi, the great king fell on the surface of the ground like a tree hit by a big thunderbolt. It was said (that) he was restored with great difficulty (somehow) to consciousness by the servants. Bharat′s mother should not have done such a bad action. The eldest son should not go to the forest. If my tender son goes to terrible (frightful) forest then I will soon go to the palace of God of death. But that king's wife having heard the distressed of grief king's pitiful words (she) only laughed and spoke. Oh knower of the righteousness. Now in what manner is (your) hesitation of the two boons promised in person earlier. From our race that is never done. Again (and) again the dejected king made efforts in great degree to change that mind. In the end, that king binded in the net of rigtheosness, having spoken, " There may be sin from me, son Rāma should be called." again felt on the surface of the ground like a bird killed by a sharp arrow.

## 3.10 Lesson 10

नृपं द्रष्टुमागच्छत्वार्यपुत्र इत्याज्ञां श्रुत्वा श्रीरामः समुत्पन्नकौतूहलो वायुवेगेन राजभवनमागच्छत्। आगत्य च विवर्णमुखं राजानं दृष्ट्वा जातचिन्तो वचनमब्रवीत्। जयत्वार्यः। भवदाज्ञयागतोऽस्मि। कुतो भवानश्रुपूर्णलोचनः। मयि जातक्रोध इव भवान् भाति। अप्यहं कृतापराध इति। पुत्रवचनम् श्रुत्वा दशरथः कृतप्रयत्नोऽपि किमपि भाषितुं नाशक्नोत्। तदा राजकुमारः कैकेयीमपृच्छत्। देवी किमिति नृपतिरद्य विषण्णमनाः। सर्वदा मां दृष्ट्वा मम पिता कुपितोऽपि प्रसीदति। अद्य तु मां संप्रेक्ष्य राज्ञस्तस्य खेदः कुतः प्रवर्तत इति। एवमुक्ता तु महात्मना राघेवेण सा पुनरतिदारुणं वचनमुक्तवती। हे राम श्रूयताम्। पुरा तव पित्रा मह्यं द्वौ वरौ दत्तौ। प्रथमेन भरताभिषेको वृतो मया द्वितेन च तव दण्डकारण्यगमनम्। यदि पितरं सत्यप्रतिज्ञं कर्तुमिच्छसि तर्हि मम वचनेन भवान्वनवासी भवतु भरतश्च राज्यं प्रशास्तु। रामस्तु तस्या वज्रोपमं वचः श्रुत्वा क्षणमपि नाव्यथत। शान्तमना एवमस्तु देव्यद्यैव वनं गच्छामीत्यभाषत।

नृपम् द्रष्टुम् आगच्छतु आर्यपुत्रः इति आज्ञाम् श्रुत्वा श्रीरामः समुत्पन्न-कौतूहलः वायु-वेगेन राज-भवनम् आगच्छत्। आगत्य च विवर्णमुखम् मुखम् राजानम् दृष्ट्वा जातचिन्तः वचनम् अब्रवीत्। जयतु आर्यः। भवत् आज्ञया आगतः अस्मि। कुतः भवान् अश्रु-पूर्ण-लोचनः । मयि जात-क्रोधः इव भवान् भाति (appears), अपि अहम् कृतापराधः इति। पुत्र-वचनम् श्रुत्वा दशरथः कृत-प्रयत्नः अपि किमपि भाषितुम् न अशक्नोत्। तदा राजकुमारः कैकेयीम् अपृच्छत्। देवी किमिति (why) नृपतिः अद्य विषण्ण-मनाः। सर्वदा मां दृष्ट्वा मम पिता कुपितः अपि प्रसीदति। अद्य तु मां संप्रेक्ष्य राज्ञः (6th of राजन्) तस्य खेदः कुतः प्रवर्तते इति। एवमुक्ता तु महात्मना राघेवेण सा पुनरतिदारुणं वचनम् उक्तवती। हे राम श्रूयताम्। पुरा तव पित्रा मह्यं द्वौ वरौ दत्तौ। प्रथमेन भरताभिषेकः वृतः मया द्वितेन च तव दण्डक-आरण्य-गमनम्। यदि पितरम् सत्य-प्रतिज्ञं कर्तुम् इच्छसि तर्हि मम वचनेन भवान् वन-वासी भवतु भरतः राज्यम् प्रशास्तु (प्र√शास् (2); rule)। रामः तु तस्या वज्रोपमं वचः श्रुत्वा क्षणम् अपि न अवयथत(प्र√व्यथ् (1); be disturbed)। । शान्त-मनाः एवमस्तु (so be it) देवी अद्य एव वनम् गच्छामि इति अभाषत।

"The Āryaputra should come to see the king' having heard (this) command, Sri Rāma, sprung up with curiosity, arrived in the king's palace with the speed of wind. Having come and having seen the pale face of the king, he thought and spoke (these) words. May you be victorious Ārya! I have come on account of your command. Why are your eyes willed with tears? It appears as if your anger has arisen im me.. Have I done (any) offence? Having heard the words of (his) son, Daśaratha indeed made an effort and was not able to say nothing. Then the prince asked Kaikayi. Devi why is the king dejected mind today? Having seen me, my father is always pleased, (he is ) angry. But today having seen me , From where king's sorrow proceed? Thus beeing said indeed by high souled Rāghava, She again spoke the very harsh words agian. Rāma may you listen. Long ago your father granted me two boons. Chosen by me, by first one Bharata's coronation and by second one your going to Daṇdaka forest. If you wish to make your father's promise true then by my words you shold become the dweller of the forest (and) Bharata should rule the kingdom. But Rāma having heard her words similar to thunderbolt was not disturbed for a moment. He spoke (with) calm mind, Devi indeed I will go to the forest today.

## 4. Bhāgavata kathā

मथुरानगरे उग्रसेनः इति राजा आसीत्। तस्य कंसः इति पुत्रः देवकी इति पुत्री च अभवताम्। कंसः क्रूरः राक्षसगुणसहितः च। सः भगिन्याः विवाहं वसुदेवेन सह अकारयत्। तौ दम्पती रथे उपवेश्य कंसः स्वयं रथं अचालयत्। मध्येमार्गं --रे कंस तव भगिन्याः अष्टमः गर्भः त्वां हनिष्यति अशरीरिशब्दं कंसः अश्रृणोत्। एतत् श्रुत्वा कंसः भगिनीं वसुदेवं च कारागृहे न्यक्षिपत्। देवकन्यां पुत्रान् जातमात्रान् कंसं जघान। अष्टमगर्भे जातं पुत्रं वसुदेवः कंसभयात् नन्दगोपगृहं प्रापयति स्म। तत्र बलरामकृष्णौ अवर्धताम्। कंस तौ हन्तुं राक्षसान् पैषयत्। पूतनाशकटासुरप्रभृतीन् राक्षसान् सर्वान् रामकृष्णौ अमारयताम्। श्रीकृष्णः स्वामातुलं कंसं अमारयत्। पश्चात् शिशुपाल-दन्तवक्त्रादीन् बहून् राक्षसांश्च अहनत्। श्रीकृष्णः रुक्मिणीसत्यभामादिकाः अनेकसहस्त्र संख्याकाः स्त्रियः उपयेमे। सः पाण्डवानां साहाय्यं अकरोत्। सः अर्जुनस्य सारथ्यमपि अकरोत्। अर्जुनः भारतयुद्धे दुर्योधनादीन् बहून् दुष्टान् अमारयत्। एवं बहून् दुर्जानान् हत्वा भूभारं अहरत्।

There was a king named Ugrasena in the city called Mathurā. He had a son Kaṁsa by name and a daughter called Devaki. Kaṁsa was wicked and possesed the qualities of demons. He celebrated the marriage of his sister with Vasudeva. Kaṁsa seated the couple in a chariot and he himself drove the chariot. On the way, Kaṁsa heard an oracle thus, “Oh Kaṁsa, your sister’s eighth child will kill you.”
Having heard this, Kaṁsa kept both Vasudeva and Devaki in prison. Kaṁsa killed the sons of Devaki as when they were born. Vasudeva being afraid of Kaṁsa, sent the son of eighth delivery to the place of Nandagopala. There Kṛṣṇa grew up with Balrāma. Kaṁsa sent rākṣasas to kill both of them. Balrāma and Kṛṣṇa killed Pūtanā, Sakaṭasura and other rākṣasas. Sri Kṛṣṇa killed Kaṁsa his maternal uncle. Thereafter he killed a number of rākṣasas like Śiśupāla and Dantavaktra. Sri Kṛṣṇa married Rukmaṇī, Satabhāma and thousands of women. Sri Kṛṣṇa helped Pāṇḍavas. He even served as a charioteer to Arjuna. Arjuna killed a number of wicked men like Duryodhana in the Mahābhārata battle. Thus he got rid of a number of wicked persons and relieved the world of evil persons.

5. Mahābhārata kathā

हस्तिनापुरे धृतराष्ट्रः पाण्डुः इति द्वौ भ्रातरौ अवर्तेताम्। धृतराष्ट्रः अन्धः पाण्डुः पाण्डुरोगी। ज्येष्ठः धृतराष्ट्रः कनिष्ठाय पाण्डवे अर्धराज्यं अयच्छत्। धृतराष्टस्य दुर्योधनादयः शतं पुत्राः अभवन्। पाण्डोः युधिष्टरः भमिसेनः अर्जुनः नकुलः सहदेवः इति पञ्च तनयाः आसन्। द्रोपदी पाण्डवानां धर्मपत्नी आसीत। दुर्योधनः द्यूतेन पाण्डवानां राज्यं अपाहरत्। राज्यभ्रष्टाः पाण्डवाः द्रोपद्या सह वनं अगच्छन्। ते वने बहूनि कष्टानि अन्वभवन्। द्वासशवर्षपर्यन्तं ते वने न्यवसन्। त्रयोदशे वर्षे अज्ञातवासं विराटनगरे अकुर्वन्। चतुर्दशे वर्षे पुनः राज्यं प्रत्यर्पय इति दुर्योधनं अप्रच्छन्। लोभी दुर्योधनः राज्यं नैच्छत्। ततः कौरवपाण्डवानां मध्ये कुरुक्षेत्रे महत् युद्धे अभूत्। भगवान् श्रीकृष्णः पाण्डवानां पक्षे आसीत्। सः अर्जुनस्य रथसारथिश्च अभवत्। भीष्मद्रोणादयः दुर्योधनपक्षीयाः सर्वे अर्जुनेन मारिताः। दुर्योधन-दुःशासनादय भीमेन संहृताः। ततः युधिष्टरः पट्टाभिषेकमङ्गलं अन्वभवत्।

There were two brothers Dhṛtarāṣṭra and Pāṇḍu in the city called Hasitanpur. Dhṛtarāṣṭra was blind and Pāṇḍu was a victim of leucoderma. The elder brother Dhṛtarāṣṭra gave half of his kindom to his younger brother Pāṇḍu. Dhṛtarāṣṭra had hundred sons named Duryodhana and the like. Pāṇḍu had five sons Yudhirṣṭra, Bhīmsena, Arjuna, Nakula and Sahadeva. Dropadi was the consort of the Pāṇḍavas. After winning a gambling Duryodhana took the kingdom of Pāṇḍavas. The Pāṇḍavas driven out from the kindom went to forest along with Dropadi. They met with a number of difficulties in the forest. They spent twelve years in the forest. They spent their thirteenth tear in the city of Virāṭa in disguise. In the fourteenth year they demanded Duryodhana to give back their kindom. The greedy Durodhana did not desire to return the kingdom. Then, ther took place a great war between the Kaurvas and Pāṇḍavas at Kurukṣetra. Lord Kṛṣṇa sided to the Pāṇḍavas. He served as the charioteer of Arjuna. Bhīṣma, Droṇa, and the like were killed by Arjuna. Duryodhana, Duḥśāsana and the others were killed by Bhīma. Afterwards Yudhirṣṭra enjoyed his coronation.
Appendxi

6. Hitopadesa